## SARPAGANDHA - सर्पगन्धा:

कुक्कुटी सर्पगन्धा च तथा काणविषाणिके । ....नैपाली हरितालञ्च रक्षोघ्ना ये च कीर्तिताः ॥

**(SS,u,60)**

वर्षासु छत्राकारा | **(Dalhana)**

ईषन्नीलारुणसुमदला पुष्पिता ग्रीष्मकाले । वर्षकाले फलपरिचितिं नीलरक्तां दधाति ॥

मूलं यस्या हरिनधवलं स्थूलमन्तःस्थचक्रम् । चन्द्राख्या सा धवलविटपा सर्पगंधा प्रसिद्धा ॥

सर्पगन्धा ऽतितिक्तोष्णा रूक्षा कटुविपाकिनी । पित्तवद्धिकरी रुच्या शूलप्रशमनी सरा ॥

कफवातहरा निद्राप्रदा हृदवसादिनि । कामावसादिनि चैव हन्ति शूलज्वरक्रिमीन् ॥

अनिद्रां भूतमुन्मादपस्मारं भ्रमं तथा । अग्निमान्द्यं विषं रक्त वाताधिक्यं व्यपोहति ॥

**(स्व)**

**(Ref:PV sharma ; dravyaguna vijnan;part2)**